# Shri Subodhananda Stotram

# શ્રીસુબોધાનન્દસ્તોત્રમ્

## Document Information

Text title : Shri Subodhananda Stotram

File name : subodhAnandastotram.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Brahmachari Medhachaitanya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# Shri Subodhananda Stotram

## શ્રીસુબોધાનન્દસ્તોત્રમ્

શ્રી કૃષ્ણદાસતનયં સહજાતભક્તિં<br>
સમ્ભૂ ષિતાઙ્કુનયનોત્તરતારબાલમ્ ।<br>
શ્રીરામકૃષ્ણકૃપયા કૃતકૃત્ય બુધ્દિં<br>
વન્દે સુબોધપુરુષં વિનયાપ્તમૂર્તિમ્ ॥ ૧॥

લોકોત્તરાર્જવગુણં જિતકામભોગં<br>
દૈવાખ્યયા ત્વભિહિતં જનનીડ્યદેવૈઃ ।<br>
તેજસ્વિતા સરલતા વ્યવહારસિધ્દં<br>
નૌમિ ધ્યુલોકવસતિં મધુરસ્વભાવમ્ ॥ ૨॥

શુધ્દાન્વયં પ્રિયજનં ચરિતેન શુધ્દ-<br>
સ્ત્વાચાર શુધ્દભજનં ધૃતશુધ્દદેહમ્ ।<br>
સંસારિણાં શરણદં, જનદુઃખતપ્તં<br>
સ્તૌમિ સ્વભાવસરલં પુરુષં મહાન્તમ્ ॥ ૩॥

સ્વસ્યાસને તુ ગુરુણા સ્વયમાસિતં ત્વાં<br>
તચ્ચિહ્નિતં સમદૃશં સમદુઃખહર્ષમ્ ।<br>
પ્રાપ્તોપદેશચરણં નિજબોધનિષ્ઠ-<br>
મીડ◌એ સુબોધતરણિં પતિતાઘનાશમ્ ॥ ૪॥

બાલ્યે વિરક્તપુરુષં યતિધર્મપાલં<br>
શ્રીરામકૃષ્ણસરણિં સતતં પ્રવિષ્ટમ્ ।<br>
તીર્થાટનેન સુખિનં ગુરુકર્મનિષ્ઠં<br>
સ્વાચાર્યસેવિનમહં ત્વભિવાદયે ત્વામ્ ॥ ૫॥

ક્રોધોપશાન્તિરખિલા યદવેક્ષણેન<br>
પ્રયાન્મહાજનગતા કિમુતેતરેષામ્ ।<br>
સ્નિગ્ધા પવિત્રસરલા ગુણયુક્તમૂર્તિ-<br>
ર્ધ્યેયા તદીયવરદા કલુષાપહર્ત્રી ॥ ૬॥

ખોકાખ્યયા ગુરુસહોદરવાગ્ દિશન્તી
    યં સ ત્વમેવ તરુણોઽર્ભકવન્નિષણ્ણઃ ।
બાલ્યં ગતેઽપિ કુટિલે ભવલુબ્ધમાર્ગે
    ધર્માર્ધ્યમાર્ગસુરસે રસિકો વિદગ્ધઃ ॥ ૭॥

દેશે, વિદેશગહને ભવદુઃખતપ્તા-
    સ્ત્વામાશ્રયન્ત ઇતરે સુકૃતે તૃષાર્તાઃ ।
શાન્તં રસં સુમધુરં પરિપીય લોકા-
    સ્તપ્તા ભવન્તિ સુખિનસ્તનુવાઙ્મનોભિઃ ॥ ૮॥

સંસારપારપથિકં નિયમપ્રધાનં
    સ્વાધ્યાયપાઠનિરતં સતતં કૃતાર્થમ્ ।
આચારચારુચતુરં સુવિચાર-નિષ્ઠં
    શાસ્ત્રોક્તકર્મનિપુણં પ્રણતઃ સુબોધમ્ ॥ ૯॥

બાલસ્વભાવનિયમાદવિરૂઢ઼ભાવં
    યાન્તં સ્થલેઽપિ કુપથા બહુદૂરમેકમ્ ।
વિશ્વાસદાર્ઢ્યબલતો શિવબોધયુક્તં
    સ્વામિન્યપિશ્રુતિમતિ પ્રણનામ દેવમ્ ॥ ૧૦॥

શ્રીરામકૃષ્ણ સઙ્ઘસ્ય નેતૃમન્યતમં વરમ્ ।
સુબોધાનન્દનાથાખ્યં પ્રણમામિ કૃતાઞ્જલિઃ ॥ ૧૧॥

ઇતિ બ્રહ્મચારિમેધાચૈતન્યવિરચિતં “શ્રીમત્સુબોધાનન્દસ્તોત્રમ્” સમ્પૂર્ણમ્ ।
પ્રણામમન્ત્રઃ-
શુદ્ધબુદ્ધિ પ્રશાન્તાય વૈરાગ્યજ્ઞાનમૂર્તયે ।
સુબોધાય નમસ્તુભ્યં ત્રિલોકં તીર્થી કુર્વતે ॥

Proofread by Aruna Narayanan

*Shri Subodhananda Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*